योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ६०

< योगवासिष्ठः | प्रकरणम् ५ (उपशमप्रकरणम्)

षष्टितमः सर्गः ६०

श्रीवसिष्ठ उवाच ।

इति हेमजटाधीशो लेभे पदमनुत्तमम् ।

विवेकाध्यवसायेन ब्राह्मण्यमिव गाधिजः ।। १

अनर्थाकारकार्यासु नासीच्चेष्टासु खेदवान् ।

भूयोभूयः प्रयुक्तासु दिनमालास्विवेश्वरः ।। २

ततःप्रभृति सोऽतिष्ठतसर्वदा विगतज्वरः ।

समासमे स्वके कार्ये जलौघाग्र इवाचलः ।। ३

हर्षामर्षविनिर्मुक्तः प्रत्यहं कार्यमाहरन् ।

उदारगम्भीरवपुर्जहाराम्बुनिधेः श्रियम् ।। ४

सुषुप्तपदधर्मिण्या चित्तवृत्त्या व्यराजत ।

निष्कम्पया प्रकाशिन्या दीपः स्वशिखयेव सः ।। ५

न निर्घृणो दयावान्नो न द्वन्द्वी नाथ मत्सरी ।

न सुधीर्नासुधीर्नार्थी नानर्थी स बभूव ह ।। ६

समदर्शनया नित्यं वृत्त्याऽचापलधीरया ।

अन्तःशीतलया रेजे परिपूर्णार्णवेन्दुवत् ।। ७

सर्वं चित्तत्त्वकलनं जगदित्यवलोक्य सः ।

प्रशान्तसुखदुःखश्रीस्तस्य पूर्णा मतिर्बभौ ।। ८

उल्लसन्विकसन्पूर्णस्तिष्ठन्गच्छन्विशन्स्वपन् ।

अभूत्समसमाधिस्थः प्रबुद्धश्चिल्लयं गतः ।। ९

स कुर्वन्विगतासङ्गं राज्यं राजीवलोचनः ।

अतिष्ठदक्षताकारो भूरिवर्षशतान्यथ ।। १०

संनिवेशमिमं देहनामकं तदनु स्वयम् ।

स जहौ तेजसाक्रान्तो रूपं हिमकणो यथा ।। ११

विवेश परमाद्यन्तकारणं कारणेश्वरम् ।

प्रज्ञया सरितां वारि परिपूर्णमिवाम्बुधिम् ।। १२

अधिगतविमलैकरूपतेजा

विजनदशां समुपेत्य शान्तशोकः ।

अलमभवदसौ परस्वरूपं

घटखमिवाम्बरसंयुतं महात्मा ।। १३

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषूपशमप्रकरणे सुरघुवृत्तान्ते सुरघुनिर्वाणं नाम षष्टितमः सर्गः ।। ६० ।।